श्रीमते परांकुशाय नमः  श्रीमते परकालाय नमः
श्रीमते यतिवराय नमः श्रीमद्वरवरमुनये नमः
श्रीमद्वरवरमुनिभिरनुगृहीता

# ।। यतिराजविंशतिः ।।

यस्स्तुतिं यतिपति प्रसादिनीं
व्याजहार यतिराजविंशतिं।
तं प्रपन्नजन चातकाम्बुदं
नौमि सौम्यवरयोगिपुङ्गवं।।

श्रीमाधवांघ्रि जलजद्वय नित्यसेवा
प्रेमाविलाशय परांकुश पादभक्तं।
कामादिदोष हरमात्मपदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना।।१
श्रीरङ्गराजचरणाम्बुज राजहंसं
श्रीमत्परांकुश पदाम्बुजभृङ्गराजं।
श्रीभट्टनाथ परकाल मुखाब्जमित्रं
श्रीवत्सचिन्ह शरणं यतिराजमीडे।।२
वाचा यतीन्द्र मनसा वपुषा च युष्मत्
पादारविन्दयुगलं भजतां गुरूणां।



कूराधिनाथ कुरुकेशमुखाद्यपुंसां
वाचानुचिन्तनपरस्सततं भवेयं।।३
नित्यं यतीन्द्र तव दिव्यवपुस्स्मृतौ मे
सक्तं मनो भवतु वाग्गुणकीर्तनेऽसौ।
कृत्यञ्च दास्यकरणेतु करद्वयस्य
वृत्त्यन्तरेऽस्तु विमुखं करणत्रयञ्च।।४
अष्टाक्षराख्य मनुराज पदत्रयार्थ
निष्ठां ममात्र वितराद्य यतीन्द्रनाथ।
शिष्टाग्रगण्यजन सेव्यभवत्पदाब्जे
हृष्टाऽस्तु  नित्यमनुभूय ममास्यबुद्धिः।।५
अल्पापि मे न भवदीय पदाब्जभक्तिः
शब्दादिभोग रुचिरन्वहमेधते हा।
मत्पापमेवहि निदानममुष्य नान्यत्
तद्वारयार्य यतिराज दयैकसिन्धो।।६
वृत्त्या पशुर्नरवपुस्त्वहमीदृशोऽपि
श्रुत्यादिसिद्ध निखिलात्मगुणाश्रयोऽयं।
इत्यादरेण कृतिनोऽपि मिथःप्रवक्तुं
अद्यापि वञ्चनपरोऽत्र यतीन्द्र वर्ते।।७
दुःखावहोऽहमनिशं तव दुष्टचेष्टः
शब्दादिभोग निरतश्शरणागताख्यः।

त्वत्पादभक्त इव शिष्ट जनौघमध्ये
मिथ्या चरामि यतिराज ततोऽस्मि मूर्खः।।८
नित्यं त्वहं परिभवामि गुरुंच मन्त्रं
तद्देवतामपि न किञ्चिदहो बिभेमि।
इत्थं शठोऽप्यशठवत् भवदीयसङ्घे
हृष्टश्चरामि यतिराज ततोऽस्मि मूर्खः।।९
हा हन्त हन्त मनसा क्रियया च वाचा
योऽहं चरामि सततं त्रिविधापचारान्।
सोऽहं तवाप्रियकरःप्रियकृद्वदेव
कालं नयामि यतिराज ततोऽस्मि मूर्खः।।१०
पापे कृते यदि भवन्ति भयानुताप
लज्जाः पुनःकरणमस्य कथं घटेत।
मोहेन मे न भवतीह भयादिलेशः
तस्मात्पुनः पुनरघं यतिराज कुर्वे।।११
अन्तर्बहिस्सकलवस्तुषु सन्तमीशं
अन्धः पुरस्स्थितमिवाहमवीक्षमाणः।
कन्दर्पवश्य हृदयस्सततं भवामि
हन्त त्वदग्रगमनस्य यतीन्द्र नार्हः।।१२
तापत्रयीजनित दुःखनिपातिनोऽपि
देहस्थितौ मम रुचिस्तु न तन्निवृत्तौ।



एतस्य कारणमहो मम पापमेव
नाथ त्वमेव हर तद्यतिराज शीघ्रं।।१३
वाचामगोचर महागुण देशिकाग्र्य
कूराधिनाथ कथिताखिल नैच्यपात्रं।
एषोऽहमेव न पुनर्जगतीदृशस्तत्
रामानुजार्य करुणैव तु मद्गतिस्ते।।१४
शुद्धात्म यामुनगुरूत्तम कूरनाथ
भट्टाख्य देशिकवरोक्त समस्तनैच्यं।
अद्यास्त्यसंकुचितमेव मयीह लोके
तस्माद्यतीन्द्र करुणैव तु मद्गतिस्ते।।१५
शब्दादिभोगविषया रुचिरस्मदीया
नष्टा भवत्विह भवद्दयया यतीन्द्र।
त्वद्दासदासगणना चरमावधौ यः
तद्दासतैकरसताऽविरता ममास्तु।।१६
श्रुत्यग्रवेद्य निजदिव्यगुणस्वरूपः
प्रत्यक्षतामुपगतस्त्विह रङ्गराजः।
वश्यस्सदा भवति ते यतिराज तस्मात्
शक्तस्स्वकीयजन पापविमोचने त्वं।।१७
कालत्रयेऽपि करणत्रय निर्मिताति
पापक्रियस्य शरणं भगवत्क्षमैव।

सा च त्वयैव कमलारमणेऽर्थिता यत्
क्षेमस्स एव हि यतीन्द्र भवच्छ्रितानां।।१८
श्रीमन्यतीन्द्र तव दिव्यपदाब्जसेवां
श्रीशैलनाथ करुणापरिणामदत्तां।
तामन्वहं मम विवर्धय नाथ तस्याः
कामं विरुद्धमखिलं च निवर्तय त्वं।।१९
विज्ञापनं यदिदमद्य तु मामकीनं
अङ्गीकुरुष्व यतिराज दयाम्बुराशे।
अज्ञोऽयमात्म गुणलेश विवर्जितश्च
तस्मादनन्यशरणो भवतीति मत्वा।।२०
इति यतिकुलधुर्यमेधमानैः
श्रुतिमधुरैरुदितैः प्रहर्षयन्तं।
वरवरमुनिमेव चिन्तयन्ती
मतिरियमेति निरत्ययं प्रसादं।।२१
न चेद्रामानुजेत्येषा चतुरा चतुरक्षरी।
कामवस्थां प्रपद्यन्ते जन्तवो हन्त मादृशः।।
पुण्याम्भोज विकासाय पापध्वान्त क्षयाय च
श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः।।
यत् स्मृतिस्सर्वसिद्धीनां अन्तराय निवारिणी
तस्मै श्रीरम्यजामातृमुनये विदधे नमः।।



श्रीमद्रङ्गं जयतु परमं धाम तेजोनिदानं
भूमा तस्मिन्भवतु कुशली कोऽपि भूमासहायः।
दिव्यं तस्मै दिशतु विभवं देशिको देशिकानां
काले काले वरवरमुनिः कल्पयन् मङ्गलानि।।
मङ्गलं मुनिवर्याय रम्यजामातृयोगिने।
यच्छात्रभावं सम्प्राप्तः श्रीशः श्रीरङ्गनायकः।।
श्रीमते सौम्यजामातृ मुनीन्द्राय महात्मने।
श्रीरङ्गवासिने भूयात् नित्यश्रीर्नित्यमङ्गलं।।
प्रणतार्तिहरांशाय प्रकृष्टगुणशालिने।
लीलयोद्धृतलोकाय लोकार्यगुरवे नमः।।

मंडयं नायक रामानुजः